स्तुन्भ, ग न ङ रोधने। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (क्रा०-स्वा०-च०-पर०-सक०-सेट्। क्त्वावेट्।) दन्त्यादिः। पञ्चमस्वरी। ग, स्तुभ्नाति। न, स्तुभ्नोति। ङ, स्तुम्भित्वा स्तुब्ध्वा। रोधनमावरणम्। इति दुर्गादासः॥

स्तुभः, पुं, छागः। इत्यमरटीकायां भरतः २। ८। ७६॥ (अग्निविशेषः। यथा, महाभारते। ३।२२०।१४।
"चातुर्मास्येषु नित्यानां हविषां योनिरग्रहः।
चतुर्भिः सहितः पुत्त्रैर्भानोरेवान्वयः स्तुभः॥")

स्तुवेय्यः, पुं, (स्तूयते इति। स्तु + "स्तुवः केय्यञ्छन्दसि।" उणा० ३।९८। इति केय्यः। कित्त्वाद्गुणाभावे सत्युवङादेशः।) इन्द्रः। इत्युणादिकोषः॥

स्तुषेय्यः, त्रि, श्रेष्ठः। उत्तमः। वैदिकशब्दोऽयम्। ष्टुधातोरौणादिकसेय्यप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्तूप, क उच्छ्राये। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। उच्छ्रायो राशीकरणम्। स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः॥

स्तूप, य इर उच्छ्राये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) षष्ठस्वरी। य, स्तूप्यति। इर्, अस्तूपत् अस्तूपीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। अतुस्तूपत्। इति दुर्गादासः॥

स्तूपः, पुं, (स्तूयते इति। स्तु + "स्तुवो दीर्घश्च।" उणा० ३।२५। इति पः दीर्घश्च।) मृदादिकूटः। राशीकृतमृत्तिकादिः। इति पुंलिङ्गसंग्रहे अमरः। ३।५।१८॥ संघातः। निष्पर्य्योजनम्। बलम्। इति संक्षिप्तसारोणादिवृत्तिः॥

स्तृ, न प्रीतिरक्षाप्रापने। इति कविकल्पद्रुमः॥ (स्वा०- पर० सक०-अक०-च-अनिट्।) न, स्तृणोति। इति दुर्गादासः॥

स्तृ, न ञ स्तृतौ। इति कविकल्पद्रुमः॥ (स्वा०-उभ०-सक०-अनिट्।) न ञ, स्तृणोति स्तृणुते स्तृतिराच्छादनम्। इति दुर्गादासः॥

स्तृक्ष, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सप्तमस्वरयुक्तमध्यः। स्तृक्षति। तरीस्तृक्षते। इति दुर्गादासः॥

स्तृह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऊ, अस्तर्हीत् अस्तृक्षत्। श, स्तृहति। तिस्तर्हयिषति। इति दुर्गादासः॥

स्तॄ ञ गि छादने। इति कविकल्पद्रुमः॥ (क्रा-उभ०-सक०-अनिट्।) ञ गि, स्तृणाति स्तृणीते स्तीर्णः स्तीर्णिः। इति दुर्गादासः॥

स्तृह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऊ, अस्तृहीत् अस्तृक्षत्। श, स्तृहती स्तृहन्ती। तिस्तृहयिषति। इति दुर्गादासः॥

स्तेन, त् क चौर्य्ये। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) अतिस्तेनत् धनं चौरः। इति दुर्गादासः॥

स्तेनं, क्ली, (स्तेनत् क चौर्य्ये + भावे अच्।) स्तेयम्। इत्यमरटीकायां भरतः।२।१०।२४॥

स्तेनः, पुं, (स्तेनयतीति। स्तेन + पचाद्यच्।) चौरः। इत्यमरः। २। १०। २४॥ तस्य दण्डनिर्णयो यथा,—
"स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये।
परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः।
स्तेनानां निग्रहादस्य यशो राष्ट्रञ्च वर्द्धते॥
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥
यस्तु तान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः।
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात्॥
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः॥"
इति मानवे ८ अध्यायः॥

तद्वैदिकपर्य्यायः। तृपुः १ तक्वा २ रिभ्वा ३ रिपुः ४ रिक्वा ५ रिहायाः ६ तायुः ७ तस्करः ८ वनर्गुः ९ हुरश्चित् १० मुषीवान् ११ मलिम्लुचः १२ अघशंसः १३ वृकः १४। इति चतुर्द्दशैव स्तेननामानि। इति वेदनिघण्टौ। ३।२४॥ *॥ देवयानिवेद्यान्नादिभोक्ता। यथा, श्रीभगवद्गीतायाम्। ३।१२।
"इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्द्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥"

स्तेप, क क्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) एकादशस्वरी। क, स्तेपयति। तिस्तेपयिषति। इति दुर्गादासः॥

स्तेमः, पुं, (स्तिम आर्द्रे + घञ्।) आर्द्रीभावः। इत्यमरः। ३।२।२९॥

स्तेयं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन + "स्तेनाद्यन्नलोपश्च।" ५।१।१२५। इति यत्। नलोपश्च) चौर्य्यम्। तत्तु चौरस्य भावः तस्य कर्म्म च इत्यमरभरतौ।२।१०।२५॥ तस्य लक्षणं यथा, प्रायश्चित्तविवेके।
"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा
यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम्॥"
तत्करणे नरकं प्रतिप्रसवश्च यथा,—
व्यासोवाच।
"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित्
नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन
तृणं वा यदि वा शाकं मृदं वा जलमेव वा।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते॥
न राज्ञां प्रतीच्छ्रीयात् शूद्रपतितादपि।
न चान्यस्मादशक्तश्च निन्दितान् वर्जयेद्बुधः॥
नित्यं याचनको न स्यात् पुनस्तत् प्रयाचयेत्॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः॥
पुष्पे शाकोदके काष्ठे तथा मूले फले तृणे।
अदत्तादानमस्तेयं मनुराह प्रजापतिः॥
ग्रहीतव्यानि पुष्पाणि देवार्च्चनविधौ द्विजैः।
नैकस्मादेव नियतमननुज्ञाय केवलम्॥
तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्बुधः।
धर्म्मार्थं केवलं ग्राह्यमन्यथा पतितो भवेत्॥
तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः।
क्षुधार्त्तैर्नान्यथा विप्र विधिविद्भिरिति स्थितिः॥"
इति कौर्म्मे उपविभागे। १६। १—१०॥

स्तेयप्रायश्चित्तं यथा,—
"एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्।
स्तेयदोषापहर्त्तॄणां व्रतानां श्रूयतां विधिः॥
धान्यान्नधनचौर्य्याणि कृत्वा कामात् द्विजोत्तम।
स्वजातीयगृहादेव कृच्छ्रार्द्धेन विशुध्यति॥
मनुष्याणान्तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानाञ्च शुद्धिश्चान्द्रायणं स्मृतम्॥
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनः।
चरेत् सान्तपनं कृच्छ्रं तत्पापपरिशुद्धये॥
भक्ष्यभोज्यापहरणे यानशय्यासनस्य तु।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥
तृणकाष्ठद्रुमाणान्तु पक्वान्नस्य गुडस्य तु।
तैलचर्म्मामिषाणान्तु त्रिरात्रं स्यादभोजनम्॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य तु।
अयस्कांस्योपलानाञ्च द्वादशाहं कणान्नभुक्॥
कार्पासकीटजोर्णानां द्विशफैकशफस्य च।
पक्षिगन्धौषधानाञ्च रज्ज्वाश्चैव त्र्यहं पयः॥
एतैर्व्रतैर्व्यपोहेत पापं स्तेयकृतं बुधः॥"
इति मात्स्ये २०१ अध्यायः॥ *॥

स्तेयस्य दण्डविधिर्दण्डशब्दे द्रष्टव्यः। सुवर्णस्तेयप्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम्॥

स्तेयी, [न्] पुं, (स्तेयमस्यास्तीति। इनिः।) चौरः। यथा। सुमन्तुः। सुवर्णस्तेयी मासं सावित्र्यष्टसहस्रं आज्याहुतीर्जुहुयात् त्रिरात्रमुपवसेत् तप्तकृच्छ्रेण वा पूतो भवति। इति प्रायश्चित्तविवेकः॥ स्वर्णकारः। इति केचित्॥

स्तैनं, क्ली, (स्तेनस्य चौरस्य भावः कर्म्म वा) स्तेन + अण्।) चौर्य्यम्। इत्यमरटीकायां भरतः। २। १०। २५॥

स्तैन्यं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन + ष्यञ्।) चौर्य्यम्। इत्यमरभरतौ।२।१०।२५॥ (यथा, महाभारते। ३। २७२। ७।
"इमां हि पत्नीमस्माकं धर्म्मज्ञां धर्म्मचारिणीम्
संसर्गदोषाच्छ्रो भावः शुचिं स्तैन्यमिवाहृतम्॥")

स्तैन्यः, पुं, (स्तेन एव। स्वार्थे ष्यञ्।) चौरः। इति शब्दरत्नावली॥

स्तैमित्यं, क्ली, (स्तिमितस्य भावः। स्तिमित + ष्यञ्।) जडता। इति राजनिर्घण्टः॥ (आर्द्रत्वम्। यथा,"स्तैमित्यं स्तिमितो वेगः।" इति वैद्यमाधवकरसंगृहीतरुग्विनिश्चयस्य ज्वराधिकारे॥"स्तैमित्यमार्द्रपटावगुण्ठितत्वमिव॥" इत्यस्य व्याख्याने विजयरक्षितः॥)